हर हर शंकर　　　　　　　　　　　　　　　　जय जय शंकर

ॐ

     

## श्रीमद्-आद्य-शंकर-भगवत्पाद-परंपरागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-कांची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शंकराचार्य-स्वामि-श्रीमठ-संस्थानम्

# श्री-सुरेश्वराचार्य-स्मरणम्

## सुरेश्वराचार्य-कृता भगवत्पाद-स्तुतिः

वेदांतोदर-वर्ति भास्वदमलं ध्वांत-च्छिदस्मद्-धियः
　दिव्यं ज्ञानमतींद्रियेऽपि विषये व्याहन्यते न क्वचित्।
यो नो न्याय-शलाकयैव निखिलं संसार-बीजं तमः
　प्रोत्सार्याविरकार्षीद् गुरु-गुरुः पूज्याय तस्मै नमः॥१॥

—नैष्कर्म्यसिद्धिः - 4.76-77

आ शैलादुदयात् तथाऽस्त-गिरितो भास्वद्-यशोराशिभिः
　व्याप्तं विश्वमनंधकारमभवद् यस्य स्म शिष्यैरिदम्।
आराद् ज्ञान-गभस्तिभिः प्रतिहतश्चंद्रायते भास्करः
　तस्मै शंकर-भानवे तनु-मनोवाग्भिर्नमः स्यात् सदा॥२॥

यत्-प्रज्ञोदधि-युक्ति-शब्दन-खज-श्रद्धैक-सन्नेत्रक-
स्थैर्य-स्तंभ-मुमुक्षु-दुःखित-कृपा-यत्नोत्थ-बोधामृतम्।
पीत्वा जन्म-मृति-प्रवाह-विधुरा मोक्षं ययुर्मोक्षिणः
तं वंदेऽत्रि-कुल-प्रसूतममलं वेधोभिधं मद्-गुरुम्॥३॥

—बृहदारण्यकभाष्यवार्त्तिकम्

# सुरेश्वराचार्य-विषयाः स्तुतयः

यदीय-संपर्कमवाप्य केवलं वयं कृतार्था निरवद्य-कीर्तयः।
जगत्सु ते तारित-शिष्य-पंक्तयो जयंति देवेश्वर-पाद-रेणवः॥१॥

—श्रीसर्वज्ञात्मेंद्रसरस्वतीश्रीचरणैः विरचितम् संक्षेपशारीरकम्

नैष्कर्म्य-सिद्ध्यभिधया सुधया सुधियां ददौ।
योऽमृतत्वं नमामस्तं सुरेश्वर-सुधा-निधिम्॥२॥

—श्रीज्ञानानंदेंद्रसरस्वती-श्रीचरणैः विरचिता चंद्रिकाख्या नैष्कर्म्यसिद्धि-व्याख्या

गौडः काश्मीर-जन्मा कलित-परिचितिः पूर्व-तंत्रे कुमारात्
ब्रह्मण्यः सर्व-वेदः स्फुट-शपथ-पथं श्रीमदाचार्य-योधी।
संन्यासं प्रापितस्तं तदनु परिचरन् योग-भूमैक-सीमा
तस्यादेशेन कांच्यामवसदथ समाः सप्ततिं काम-पीठे॥३॥

वर्षे शुद्धतरे (2695) कलेरथ भवे ज्येष्ठे सित-द्वादशी-
रात्रौ चित्रित-सर्व-भूः स यशसा श्रीमान् सुरेशः स्वयम्।
श्रित्वा पुण्य-रसां रसेन महता युंजन् लयाख्ये पथि
श्लक्ष्ण-श्री-शिव-लिंग-भूयमभजत् साक्षात् सतां पश्यताम्॥४॥

—श्रीसर्वज्ञसदाशिवबोधेंद्रकृता पुण्यश्लोकमंजरी

स्थिर-बोध-घन-प्रताप-दाम्नोर्गुरु-पृथ्वीधव-विश्वरूप-नाम्नोः।
चिरमर्थनयोप-तुंग-भद्रं स-रसः सौतु सुरेश्वरः स भद्रम्॥५॥

प्रणयन् लय-योगमक्षुदंच्यं पुनराचार्य-मठे निपद्य कांच्याम्।
भुवि यः शिव-लिंग-भूयमंते प्रविवान् सोऽस्तु सुखाय नः सुशांतः॥६॥

प्रथिते किल कामकोष्ठ-नाम्नि प्रथते पुण्य-रसेति यत् पवित्रम्।
पदमस्य गुरोः समाधि-भूमेः प्रणये मंडन-चिह्नितं निकामम्॥७॥

—श्रीसदाशिवेंद्रसरस्वतीश्रीचरणविरचिता जगद्गुरुरत्नमाला

पवित्रितेतराद्वैत-मठ-पीठी-शिरो-भुवे ।
श्री-कांची-शारदा-पीठ-गुरवे भव-भीरवे॥८॥

वार्तिकादि-ब्रह्म-विद्या-कर्त्रे ब्रह्मावतारिणे।
सुरेश्वराचार्य-नाम्ने योगींद्राय नमो नमः॥९॥

—पंचषष्टितमैः पीठाधिपतिभिः श्रीमत्सुदर्शनमहादेवेंद्रसरस्वतीश्रीचरणैः प्रणीतः श्री-कांची-कामकोटि-पीठ-जगद्-गुरु-परंपरा-स्तवः

# सुरेश्वराचार्य-वागमृतम्

सत्यं ज्ञानमनंतमेकममलं ध्वस्तांधकारं परं
निर्द्वैतं हृदि पद्म-मध्य-निलयं निश्शेष-धी-साक्षिणम्।
वेदांतोपनिविष्ट-बोध-विषयं प्रत्यक्तया योगिनां
भक्त्या तं प्रणिपत्य वेद-शिरसो वक्ष्यामि सद्-वार्तिकम्॥१॥

यस्येदं सकलामलेंदु-किरण-प्रख्यैर्यशोरश्मिभिः
व्याप्तं यश्च कृपालुता-पर-वशश्चक्रे हितं दुःखिनाम्।
यद्-वाणी-कुलिशावरुग्ण-मतयः पेतुर्दिशस्तार्किकाः
भक्त्या पूज्यतमं प्रणम्य तमहं तद्-भाष्य-नीतौ यते॥२॥

तैत्तिरीयक-सारस्य वार्तिकामृतमुत्तमम्।
मस्करींद्र-प्रणीतस्य भाष्यस्यैतद् विवेचनम्॥३॥

मुमुक्षा-सार्थवाहस्य भव-नाम-भृतो यतेः।
शिष्यश्चकार तद्-भक्त्या सुरेशाख्यो महार्थ-वित्॥४॥

ध्यानैक-तान-निबिडाहित-चेतसोऽजं
प्रध्वस्त-कृत्स्न-निज-मोह-समस्त-दोषम्।
प्रत्यक्-तया शुभ-धियो यतयोभ्युपेत्य
यं देवमेकममलं प्रविशंति सोऽव्यात्॥५॥

—सुरेश्वराचार्यकृतं तैत्तिरीयोपनिषद्भाष्यवार्त्तिकम्

❀❀❀